International Journal of Sanskrit Research 2019; 5(4): 181-183

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 181-183
© 2019 IJSR
www.anantaajournal.com
Received: 01-05-2019
Accepted: 03-06-2019

**Dr. Hariprasad K**
Assistant Professor,
Department of Education,
Rastriya Sanskrit Sansthan (Deemed University) Rajiv Gandhi Campus, Sringeri, Karnataka, India

**Correspondence**
**Dr. Hariprasad K**
Assistant Professor,
Department of Education,
Rastriya Sanskrit Sansthan (Deemed University) Rajiv Gandhi Campus, Sringeri, Karnataka, India

# महाभारतोक्तानि वैदिकतत्त्वानि

**Dr. Hariprasad K**

**सारांश**
"वेदोऽखिलो धर्ममूलम्" "धर्मो धारयते प्रजाः" "धर्मो रक्षति रक्षितः" इत्याद्युक्तयः वेदस्य लोकोपकारकत्वं प्रतिपादयन्ति। किन्तु वेदार्थान् अवगत्य तदनुसारं प्रवर्तितुं सामान्याः न शक्नुवन्तीत्यतः वेदार्थान् अवगमयितुं स्मृतयः आविर्बभूवुः । तेनापि येषाम् अवगतिर्न भवति तेषां निमित्तं रामायणमहाभारतादीनि काव्यानि रचितानि । रामायणे २४सहस्रं पद्यानि सन्ति । महाभारते तु एकलक्षं पद्यानि सन्ति । अष्टादशपर्वसु विभक्ते महाभारते भूरिशः वेदार्थोपबृंहणं वरीवर्ति । अनुशासनपर्वणि युधिष्ठिरविषादस्य प्रकरणे भीष्मपर्वणि भगवद्गीतायाः सन्दर्भे अन्यत्र क्वचिच्च विद्यमानानि वैदिकतत्त्वानि चित्वा शोधलेखोऽयं उपनिबद्धो वर्तते ।

**कुटशब्दः** कर्म, महाकाव्यम्, पापभीतिः, अष्टादशाध्यायिनी, स्नायुपाशः

**प्रस्तावना**
धर्मार्थकाममक्षाख्यपुरुषार्थचतुष्टयं सनातनधर्मानुयायिमानवानां जीवनलक्ष्यं वर्तते । तत्साधयितुं ज्ञानमेव सर्वोत्कृष्टं साधनमिति ब्रुवन्ति मनीषिणः "ज्ञानं तृतीयं मनुजस्य नेत्रम्" इत्यादिभिः । यद्यपि एतादृशं ज्ञानं आचार्यमुखादेव प्राप्यते इति श्रुतिराचष्टे "आचार्यवान् पुरुषो वेद" "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् " इति । तथापि प्राप्तस्य ज्ञानस्य विस्तारः स्वाध्यायप्रवचनाभ्यां भवतीत्यतः तद्विधत्ते " स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्" इति। स्वाध्याय इत्येतत् समस्तसंस्कृतवाङ्मयस्य उपलक्षणम्। मन्दमतीनामपि जीवनलक्ष्यसिध्यर्थं चतुर्वर्गफलप्राप्तिः तेषामपि भूयादिति संस्कृतवाङ्मयस्य विविधप्रकाराः उपनिबद्धाः ।
संस्कृतवाङ्मयम् प्रभुसंहिता, सुहृत्संहिता, कान्तासम्हिता चेति त्रिधा सामान्यतः विभक्तं वर्तते । नृपवदादिशतीत्यतः वैदिकवाङ्मयं प्रभुसंहितेति कथ्यते । सुहृदिव सौहार्देन बोधयतीत्यतः स्मृतिप्रस्थानं सुहृत्संहितेत्युच्यते। कान्ता इव कमनीयवचोविलासेन अवगमयन्तीत्यतः काव्यानि कान्तासंहितेति कथ्यन्ते। महाभारतम् एकम् अनितरसाधारणं महाकाव्यम्। काव्यत्वात् कान्तासंहितत्वं स्पष्टम् । आख्यानकाख्यायिकालेख्यव्याख्यानैः स्तुतिस्तोत्रस्तवनैः दृष्टान्तोदाहरणकथाविस्तरैः वर्णाश्रमधर्मादिविचारैः समस्तलोकानां अभ्युदयनिश्रेयसप्राप्तिमार्गनिचयैः समुपबृंहितस्य एतस्य माहात्म्यं तु उपवर्णयितुं पद्यमेकं पर्याप्तं भवति–

> धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
> यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥ इति ।
> अत्र वेदोक्तम् अतिगूढमपि तत्त्वं हृदयङ्गमतया विस्तरेण सदृष्टान्तं प्रतिपदितमिति अतिशयो वर्तते । पुरुषार्थसिद्धिः अनेन भवतीति साक्षादेव भगवता वेदव्यासेनात्र उच्यते–
> अर्थशास्त्रमिदं पुण्यं धर्मशास्त्रमिदं परम् ।
> मोक्षशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥ इति

**उद्देश्यानि**
- सुविशाले महाभारते वेदार्थचिन्तनं व्यधायीत्यस्य परिशीलनम्
- वेदार्थचिन्तनं काव्येषु विफुलतया क्रियते इत्यस्य प्रमाणीकरणम्
- कान्तासंहिता इत्यभिधानात् काव्यानाम्, वेदोक्ततत्वानां लीलयावगमार्थं महाभारतादीनि काव्यानि पराम्रष्टव्यानीति ज्ञापनम्

**शोधपद्धतिः**
"अनन्ता वै वेदा" इत्युक्तेः "यन्नेहास्ति न तत् क्वचित" इत्युक्तेश्च समग्रग्रन्थावलोकनं न तावत् सुकरं तथापि स्थालीपुलाकन्यायेन ग्रन्थानां सर्वेक्षणं विधाय शोधोऽयं व्यधायि।

**अनुशासनपर्व**

महाभारतस्य युद्धं समाप्तम् । सर्वेऽपि कौरवाः मृताः । समग्रं अष्टादश अक्षौहिणीसैन्यं विनष्टम् । धर्मराजस्य शासने सर्वाः प्रजाः धरण्यां दिवमनुभवन्ति स्म । किन्तु धर्मराजः चक्रवर्ती सन्नपि सौख्यं नावहति । युद्धारम्भे अर्जुनः यथा –

तान् समीक्ष्य स कौन्तेय सर्वान् बन्धूनवस्थितान् ।
कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।।
दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ।
सीदन्ति मम गात्राणि मुखञ्च परिशुष्यति – – – –
एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन – – – –
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव – – –
अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ इति ब्रुवन् युद्धाद् विमुखो भवति तथा

धर्मराजोऽपि विषीदति युद्धात्परम् !!! पर्वण्यस्मिन् तस्य मानसिकीम् अशान्तिं पापभीतिं च निवारयितुं भीष्मः बहुधा यदुपदिश्य शरीरत्यागं करोति तदेव भगवान् वेदव्यासःविस्तरेणावर्णयत् । रणक्षेत्रे शरशय्यायां शरीरत्यागार्थम् उत्तरायणपुण्यकालं प्रतीक्षमाणं पितामहं भीष्ममुपसृत्य धर्मराजः मनसः अशान्तिं पापभीतिं च इत्थं विनिवेदयति–

न च मे हृदये शान्तिरस्ति – – –
रुधिरेणावसिक्ताङ्गं प्रस्रवन्तं यथाचलम्।
त्वां दृष्ट्वा पुरुषव्याघ्र सीदे वर्षास्विवाम्बुजम् ॥
तथा चान्ये नृपतयः सहपुत्राः स्वबान्धवाः ।
मत्कृते निधनं प्राप्ताः किं नु कष्टतरं ततः ॥
वयं हि धार्तराष्टाश्च कालमन्युवशंगताः ।
कृत्वेदं निन्दितं कर्म प्राप्स्यामः कां गतिं नृप ॥
इत्येवं बहुधा विलपन् एतादृशपापेभ्यः विमुक्त्यर्थं मामुपदिशतु इति तं प्रार्थयते–
अन्यस्मिन्नपि लोके वै यथा मुच्येम किल्बिषात् ।
तथा प्रशाधि मां राजन् मम चेदिच्छसि प्रियम् ॥ इति ।

तदा धर्मराजस्य पापभीतिं निवारयितुं गौतमीमृत्युसंवादरूपिणीमेकां कथां भीष्मः श्रावयति -

गौतमी इत्येका साध्वी स्थविरा आसीत् । तस्याः सुतः एकदा सर्पेण दष्टो भूत्वा अम्रियत । तद्विज्ञाय कश्चन अर्जुनकाख्यः लुब्धकः तं सर्पं स्नायुपाशेन बध्वा गौतम्याः समीपम् आनीय कथमेनं सर्पं हन्याम् ? इति अपृच्छत् । तदा गौतमी अवदत्– त्यज्यतामयं सर्पः। अस्य हननेन मम पुत्रः पुनः न जीविष्यति–

"हत्वा चैनं नामृतः स्यादयं मे जीवत्ययं कोऽत्ययः स्यादयं ते" इति।

लुब्धको वदति– अस्य हननेन बहूनां संरक्षणं भवति, अस्य एकस्य संरक्षणेन बहूनां मरणं भवितुमर्हति। धर्मविदः अपराधिनं न मुञ्चन्ति। अतः एषः अवश्यं हन्तव्यः।

अस्मादेकाद् बहवो रक्षितव्या नैको बहुभ्यो गौतमि रक्षितव्यः।
कृतागसं धर्मविदस्त्यजन्ति सरीसृपं पापमिमं जहि त्वम् ॥ इति।

तदानीं सर्पः वदति – अहं तु परतन्त्रः । मृत्युर्मां कर्मण्यस्मिन् प्राचोदयत् । मम दोषोऽत्र कोऽपि नास्ति । मृत्योरेव किल्बिषमेतत् । अतः मां परित्यज इति । तदानीं मृत्युरागत्य आत्मनः अदोषित्वमुक्त्वा काल एव एतस्य कारणमिति कथयति –

प्रचोदितोऽहं कालेन पन्नग त्वामचूचुदम् ।
विनाशहेतुर्नास्य त्वमहं न प्राणिनः शिशोः ॥

तदानीं तत्र कालः प्रत्यक्षीभूय, कोऽपि पूर्वोक्तः सर्पो वा मृत्युर्वा लुब्धको वा स्वयं वा अस्य बालकस्य मरणस्य कारणं न, प्रत्युत तद्बालकस्य कर्माण्येव तन्मरणस्य कारणम् इति वदति । इत्थं तद्बालकस्य मरणस्य कारणं तत्कृतं कर्म एव यथा भवति तथैव महाभारतयुद्धे ये केऽपि बान्धवाः, आचार्याः, अन्ये वा मृताः तस्य सर्वस्यापि कारणं भवति तत्तद्व्यक्तिविशेषेण कृतं कर्म । अतः युद्धे मृतानां कारणं अहमेवेति धर्मराजस्य विलपनम् अयुक्तमिति अवगमयति भीष्मः। तदर्थं पर्वण्यस्मिन् बहुधा कर्मणः सुखदुःखादिहेतुत्त्वं प्रतिपादितम् -

पञ्चभिरिन्द्रियैः कृतं कर्म भोगेन विना न नश्यति । अकृतस्य कर्मणः भोगोऽपि न भवति । सत्कर्माणि ये कुर्वन्ति ते पुण्यं लभन्ते । निन्द्यं कर्म ये कुर्वन्ति ते पापभाजो भवन्ति । कर्मानुगुणं फलं भवति । स्वयं यत्कर्म नरः करोति तत्फलं स्वयमेव भुञ्जीत । कर्मणः कारणादेव मनुष्यः नानाजातिषु जन्म प्राप्नोति । किमप्युद्देश्यं मनसि निधाय क्रोधेन कोऽपि किमपि कर्म करोति चेत् कथमपि तस्य कर्मणः नाशः न भवति । किमपि कर्म कृत्वा तस्य फलं तु केनचित् न भुक्तं इति उदाहरणन्तु न कुत्रापि विद्यते । मनुष्याः उत देवताः वा कृतस्य कर्मणः फलं अभुक्त्वा स्थातुं नैवार्हन्ति । अतः यथा कृषकः यादृशं बीजं उप्त्वा तादृशमेव फलं प्राप्नोति तथा साधुनिन्दितकर्मभ्यां तदनुरूपिफलं नरः प्राप्नोति । अतः अनेन इयं शिक्षा प्राप्यते यत् निन्द्यं कर्म न कर्तव्यम्, श्लाघ्यमेव कर्म कर्तव्यमिति ।

**भीष्मपर्व**

भीष्मपर्वणः प्रमुखः भागो भवति अष्टादशाध्यायिनी भवद्गीता । आध्यात्मिकप्रपञ्चे भगवद्गीतासमः अन्यः कश्चन ग्रन्थो न विद्यते जगतितले । गीतामाहात्म्ये पृथिवीमुद्दिश्य साक्षात् भगवता विष्णुना इत्थमुक्तम्

गीता मे परमा विद्या ब्रह्मरूपा न संशयः । अर्धमात्राक्षरा नित्या साऽनिर्वाच्यपदात्मिका ॥
चिदानन्देन कृष्णेन प्रोक्ता स्वमुखतोर्जुनम् । वेदत्रयीपरानन्दतत्त्वार्थज्ञानसंयुता ॥ इति ।
वैशम्पायनः तावत् "सर्वशास्त्रमयी भारतामृतसर्वस्वं गीता" इति कथयति ।

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः । पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥ इति गीताध्यानश्लोकेषु विद्यते ।

इत्थं भगवद्गीता सर्वासामुपनिषदां सारभूता वर्तते चेदपि क्वचित्तु साक्षात् उपनिषदामेव वाक्यानि किञ्चित् परिवर्तनं प्राप्य गीतायाम् विलसन्ति । यथा–

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।
अजो नित्यः शाश्वतोऽयं न हन्यते हन्यमाने शरीरे ॥ कठ. १–२–१८
न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणं न हन्यते हन्यमाने शरीरे ॥ गीता २/२०
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥ कठ. १/३/१०
इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ गीता. ३/४२

ऊर्ध्वमूलोऽवाक्शाखा एषोऽश्वत्थः सनातनः । तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।
तस्मिंल्लोका श्रिताः सर्वे तदु नात्येति कश्चन ॥ कठ. २/३/१
ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम् छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ।
अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ॥ गीता १५/१

एतदतिरिच्य क्वचित्तु वेदमन्त्रान् अवगमयितुमेव महाभरातम् प्रवृत्तमितिवत् प्रतिभासते । यथा–

केवलाघो भवति केवलादी । ऋग्वेदः १०–११७–६

महाभारते विद्यमानानां सर्वेषां सत्पात्रभिन्नानां प्रतिनिधिभूते दुर्योधने एतत् साक्षात् समन्वेति । पाण्डवान् अन्याय्येनैव वनं सम्प्रेष्य तत्रापि बहुधा हन्तुमुपक्रम्य पश्चात् वनवासात्परमपि किमप्यदत्वा स्वयमेव दुर्योधनः पाण्डवान्नमभुङ्क्त । अत एव सः केवलाघोऽभवत् ।

शतपथब्राह्मणस्य अग्रिममन्त्रस्तु कौरवपाण्डवेषु सुष्टु समन्वेति ।

देवाश्च वा असुराश्च । उभये प्राजापत्यः पस्पधिरे । ततोऽसुरा अतिमानेनैव कस्मिन्नु वयं जहुयामेति । स्वेस्वेवास्येषु जुह्वतश्चेरुस्ते अतिमानेनैव पराबभूवुः । तस्मानातिमन्येत । पराभवस्यैतन्मुखं यदतिमानः । अथ देवाः । अन्योन्यस्मिन्नेव जुह्वतश्चेरुस्तेभ्यः प्रजापतिरात्मानं प्रददौ । यज्ञो हैषमास । यज्ञो हि देवानामन्नम् । शतपथब्राह्मणम् ५–१–१ १–२

महाभारतं पठित्वा ऋग्वेदस्यायं मन्त्रः स्पष्टो भवति -
अक्षैर्मा दीव्यः कृषिमत् कृषस्व वित्ते रमस्व बहुमन्यमानः ।
तत्र गावः कितव तत्र जाया तन्मे विचष्टे सवितायमर्थः ॥ ऋग्वेदः १०/३४/१६
अत्र गावः सम्पदामुपलक्षणम् । सम्पदः स्वीयाः एव भवन्ति । जाया स्वीया एव तिष्ठति ।

विपर्यये तु धर्मराजस्य यथा स्थितिरुत्पन्ना तथा सम्पदः विनश्यन्ति । जाया अपि परकीया भवति । एवं वेदार्थं महाभारतमाध्यमेन सम्यगवबुध्यते –

स्वस्ति पन्थानमनुचरेम सूर्याचन्द्रमसाविव ।
पुनर्ददताघ्नता जानता संगमेमहि ॥ ऋग्वेदः ५–५१–१५

**उपसंहार**

इत्थं महाभारते भीष्मः धर्मराजस्य पापभीतिं विविधाभिः कथाभिः शिवसहस्रनामविष्णुसहस्रनामादिस्तोत्रोपदेशेन कृष्णकार्तिकेयसुब्रह्मण्यादिमाहात्म्यवर्णनेन च निवार्य तदीयप्रश्नानां समाधानानि प्रदाय उत्तारायणपुण्यकाले सम्प्राप्ते देहत्यागं करोति इति वर्णनं भगवता व्यासेन ग्रथितमस्ति । भीष्मपर्वणि तु भगवद्गीता पञ्चमवेद इति ख्याता उपनिषदाम् अगणितमन्त्रैः संवलिता वर्तते । बालानां न केवलं आध्यात्मिकविकासाय अपि तु नैतिकचारित्रिकादिविकासाय च महाभारते विकीर्णानि वेदोक्ततत्वानि छात्राणां अत्यन्तं उपकाराय कल्पन्ते ।

**सन्दर्भग्रन्था**


1. भीष्मगीता, भवेश नाथ पाठक ईष्टर्न बुक लिंकर्स
2. महाभारसूक्तिसुधा, सुभाष विद्यालङ्कार प्रतिभा प्रकाशन
3. महाभारत तृतीय एवं षष्ठ खण्ड गीताप्रेस गोरखपुर
4. रामचन्द्रस्वामी हेच्. श्रीरामकृष्णाश्रम मैसूरु (२००३)
5. नारायणराव के. "महाभारत" श्रीनिधि पब्लिकेशन् बेंगळूरु (२०१०)
6. श्रीनिवासगोपालाचार्य "शब्दार्तकौस्तुभ" बेंगळू प्रेस्, बेंगळूरु (१६८४)
7. छान्दोग्योपनिषत गीताप्रेस गोरखपुर (सं २०६८)